# Brahmakritam Hari Stotram

# ब्रह्मकृतं हरिस्तोत्रम्

## Document Information

Text title : Brahmakritam Hari Stotram

File name : brahmakRRitaMharistotram.itx

Category : vishhnu, vishnu, brahmavaivartapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, pUrvabhAga | adhyAya 32/74-81||

Latest update : March 22, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2025

*sanskritdocuments.org*

# ब्रह्मकृतं हरिस्तोत्रम्

ब्रह्मोवाच ।
रक्ष रक्ष हरे मां च निमग्नं कामसागरे ।
दुष्कीर्तिजलपूर्णे च दुष्पारे बहुसङ्कटे ॥ ७३॥

भक्तिविस्मृतिबीजे च विपत्सोपानदुस्तरे ।
अतीव निर्मलज्ञानचक्षुःप्रछन्नकारणे ॥ ७४॥

जन्मोर्मिसङ्गसहिते योषिन्नक्रौघसङ्कुले ।
रतिस्त्रोतःसमायुक्ते गम्भीरे घोर एव च ॥ ७५॥

प्रथमामृतरूपे च परिणामविषालये ।
यमालयप्रवेशाय मुक्तिद्वारातिविस्मृते ॥ ७६॥

बुद्ध्या तरण्या विज्ञानैरुद्धरास्मानतः स्वयम् ।
स्वयं च त्वं कर्णधारः प्रसीद मधुसूदन ॥ ७७॥

मद्विधाः कतिचिन्नाथ नियोज्या भवकर्मणि ।
सन्ति विश्वेश विधयो हे विश्वेश्वर माधव ॥ ७८॥

न कर्मक्षेत्रमेवेदं ब्रह्मलोकोऽयमीप्सितः ।
तथापि नः स्पृहा कामे त्वद्भक्तिव्यवधायके ॥ ७९॥

हे नाथ करुणासिन्धो दीनबन्धो कृपां कुरु ।
त्वं महेश महाज्ञाता दुःस्वप्नं मां न दर्शय ॥ ८०॥

इत्युक्त्वा जगतां धाता विरराम सनातनः ।
ध्यायं ध्यायं मत्पदाब्जं शश्वत्सस्मार मामिति ॥ ८१॥

ब्रह्मणा च कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् ।
स चैवाकर्ण्य विषये न निमग्नो भवेद्ध्रुवम् ॥ ८२॥

मम मायां विनिर्जित्य संज्ञानं लभते ध्रुवम् ।

इह लोके भक्तियुक्तो मद्भक्तप्रवरो भवेत् ॥ ८३॥

इति श्रीब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे पूर्वे द्वात्रिंशाध्यायान्तर्गतं
ब्रह्मकृतं हरिस्तोत्रं समाप्तम् ।

ब्रह्मवैवर्तपुराण । श्रीकृष्णजन्म, पूर्वभाग । अध्याय ३२/७४-८१ ॥

brahmavaivartapurANa . shrIkRRiShNajanma, pUrvabhAga . adhyAya 32/74-81..

Proofread by PSA Easwaran

*Brahmakritam Hari Stotram*

pdf was typeset on March 22, 2025

Please send corrections to *sanskrit@cheerful.com*